# A stotra on Adi Shankaracharya in bhujangaprayAta meter

# શ્રીગુરુભુજઙ્ગસ્તોત્રમ્

## Document Information

Text title : Gurubhujanga Stotram

File name : gurubhujaNgastotram.itx

Category : deities_misc, gurudev, shankarAchArya, bhujanga

Location : doc_deities_misc

Transliterated by : P.R. Kannan prkannanvashi at yahoo.com

Proofread by : P.R. Kannan, PSA Easwaran

Description-comments : Scanned book has Tamil translation

Latest update : October 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 23, 2024

*sanskritdocuments.org*

A stotra on Adi Shankaracharya in bhujangaprayAta meter

# શ્રીગુરુભુજઙ્ગસ્તોત્રમ્

શ્રીગુરુભ્યો નમઃ ।
સદેકં પરં કેવલં નિર્વિકારં નિરાકારમાનન્દમાત્રં પવિત્રમ્ ।
સ્વયંજ્યોતિરવ્યક્તમાકાશકલ્પં શ્રુતિર્બ્રહ્મ યત્પ્રાહ તસ્મૈ નમસ્તે ॥ ૧॥

ય એકોઽપિ માયાવશાત્સર્વહેતુઃ સ્વસૃષ્ટેષુ વિશ્વેષુ વિષ્વક્પ્રવેશાત્ ।
શ્રુતૌ જીવ ઇત્યુચ્યતે કેવલાત્મા તુરીયાય શુદ્ધાય તસ્મૈ નમસ્તે ॥ ૨॥

ન યસ્માદિહ દ્રષ્ટૃ વિજ્ઞાતૃ ચાન્યત્ક્વચિત્સ્યાત્પરં દ્રષ્ટૃ વિજ્ઞાતૃ વા યત્ ।
સમસ્તાસુ બુદ્ધિષ્વનુસ્યૂતમેકં નમો બ્રહ્મણે જીવરૂપાય તસ્મૈ ॥ ૩॥

મુખાદ્દર્પણે દૃશ્યમાનો ન ભિન્નો મુખાભાસ એવં ચિદાભાસ ઈશઃ ।
ચિતો નૈવ ભિન્નોઽસ્તિ માયાસ્થિતો યઃ પરેશાય તસ્મૈ નમઃ કેવલાય ॥ ૪॥

યથા સૂર્ય એકઃ સ્થિતસ્તોયપાત્રેષ્વનેકેષુ યો નિર્વિકારસ્તથાઽઽત્મા ।
સ્થિતઃ સ્વીયબુદ્ધિષ્વનેકાસુ નિત્યશ્ચિદેકસ્વરૂપાય તસ્મૈ નમસ્તે ॥ ૫॥

સ્થિતોઽનેકબુદ્ધિષ્વયં જીવ એકો વિભુઃ કારણૈકત્વતો નાત્ર નાના ।
ઇતિ ત્યક્તસર્વૈષણાપીહ યસ્ય પ્રસાદાદ્દ્વિજાનન્તિ તસ્મૈ નમસ્તે ॥ ૬॥

મુખૈઃ પઞ્ચભિર્ભોગ્યવસ્તૂનિ ભુઙ્ક્તે હ્યભોક્તાપિ બુદ્ધિસ્થિતો બુદ્ધિતુલ્યઃ ।
કરોતીવ કર્માણ્યકર્માપિ યો વૈ વિચિત્રાય તસ્મૈ નમસ્તેઽસ્તુ નિત્યમ્ ॥ ૭॥

ચિદાભાસ એવાત્ર કર્તેવ ભાતિ સ્વરૂપાપરિજ્ઞાનતો યસ્ય નૂનમ્ ।
સ્વબુદ્ધેરિયં કર્તૃભોક્તૃત્વરૂપા મૃષા સંસૃતિર્વૈ નમસ્તેઽસ્તુ તસ્મૈ ॥ ૮॥

ચિદાભાસચૈતન્યબુદ્ધીર્વિવિચ્યાત્ર વિજ્ઞાય સંસારબન્ધાદ્વિમુક્તઃ ।
ય એતદ્વિવેકાવધિં સ્વસ્ય મેને સમસ્તં ચ સંસારમસ્મૈ નમસ્તે ॥ ૯॥

ન કસ્યાપિ સંસારલેશોઽસ્તિ કશ્ચિત્સ કર્તૃત્વભોક્તૃત્વરૂપો હિ મિથ્યા ।
સમસ્તોઽપ્યયં યત્સ્વરૂપાવિવેકાન્નમસ્તે સદા નિત્યમુક્તાય તસ્મૈ ॥ ૧૦॥

જડા બુદ્ધિરાત્મા પરો નિર્વિકારશ્ચિદાભાસ એકોઽપિ મિથ્યૈવ જીવઃ ।

ય એતદ્વિવેકી સ્વતો નિત્યમુક્તઃ સદા નિર્વિકારાય તસ્મૈ નમસ્તે ॥ ૧૧॥

ચિદાભાસ એકોઽવ્યયઃ કારણસ્થો ય ઈશઃ સ એવેહ કાર્યસ્થિતઃ સન્ ।
અભૂજ્જીવસંજ્ઞઃ સ એકો હિ જીવઃ સ ભિન્નો ન યસ્માન્નમસ્તેઽસ્તુ તસ્મૈ ॥ ૧૨॥

યદજ્ઞાનતો જીવનાનાત્વમાહુર્મહામાયયા મોહિતા વાદદક્ષાઃ ।
વિવેકી વદત્યેકમેવાત્ર જીવં પરિત્યક્તવાદો નમસ્તેઽસ્તુ તસ્મૈ ॥ ૧૩॥

ચિદાભાસ એકોઽથવા નેતિ સર્વે વિમુહ્યન્તિ બેદાન્તિનોઽપ્યન્યભક્તાઃ ।
તથાપ્યેક એવેતિ ધીદાર્ઢ્યદાતા ય આત્મા સ્વભક્તસ્ય તસ્મૈ નમસ્તે ॥ ૧૪॥

મુખાદર્શયોરેક એકૈકતાયાં મુખાભાસ એવં ચિદાભાસ એકઃ ।
સ્વચિદ્બ્રહ્મબિમ્બૈક્યમાયૈક્યતોઽયં યદંશોઽખિલેશો નમસ્તેઽસ્તુ તસ્મૈ ॥ ૧૫॥

શ્રુતિર્હ્યેકતાં બ્રહ્મણો વક્તિ નૂનં સજાતીયભેદાદિશૂન્યં તતોઽત્ર ।
સ્વમાયૈકતાપ્યસ્ય યુક્ત્યાપિ સિદ્ધા નમસ્તે સદૈકસ્વરૂપાય તસ્મૈ ॥ ૧૬॥

ન માયાબહુત્વં તદા તત્પ્રતિષ્ઠા અનેકેશ્વરાઃ સમ્ભવેયુર્હિ નૈતત્ ।
કચિદ્યુજ્યતે યસ્ય માયાપ્યનેકા નમસ્તે જગદ્ધેતુભૂતાય તસ્મૈ ॥ ૧૭॥

ન માયાં વિના યસ્ય કર્તૃત્વમસ્તિ પ્રવેશોઽપિ તસ્માત્સમસ્તં મૃષૈવ ।
મહામાયિને નિર્વિકારાય તસ્મૈ નમો બ્રહ્મરૂપાય શુદ્ધાય તુભ્યમ્ ॥ ૧૮॥

ય આત્મા દૃગેવાઽઽસ દૃશ્યં ત્વનાત્મા વિવેકાદ્દ્વયોરાત્મદૃષ્ટિઃ સદૃશ્યે ।
વિનષ્ટો ભવેત્સા દૃશિ સ્વસ્વરૂપે નમસ્તે દૃગાત્મસ્વરૂપાય તસ્મૈ ॥ ૧૯॥

સ દૃગ્નિર્વિકારઃ સ્વમાયા જડેયં દૃગાભાસ એકો મૃષૈવેતિ યસ્ય ।
જગત્કર્તૃતા તાત્ત્વિકી નાસ્તિ તસ્મૈ નમઃ કેવલાકર્તૃરૂપાય તુભ્યમ્ ॥ ૨૦॥

અમાય્યેવ માયી વિભુઃ શુદ્ધ આત્મા સૃજત્યત્ત્યવત્યેતદાનન્દપૂરઃ ।
ન માયાં વિના સ્રષ્ટૃતા સાક્ષિતા વા વિશુદ્ધાત્મનો યસ્ય તસ્મૈ નમસ્તે ॥ ૨૧॥

ચિતાભાસ એવાખિલોપાધિનિષ્ઠઃ સમસ્તૈકસાક્ષી સ જીવેશસંજ્ઞઃ ।
ચિદંશોઽખિલાત્મા ન ભિન્નોઽસ્તિ યસ્માન્નમસ્તે વિશુદ્ધાત્મરૂપાય તસ્મૈ ॥ ૨૨॥

અહં સચ્ચિદાનન્દ આત્મૈવ શુદ્ધો વિમુક્તોઽસ્મિ વેદાન્તવાક્યાર્થબોધાત્ ।
ઇતિ સ્વસ્વરૂપં વિજાનાતિ વિદ્વાન્પરં યત્પરેભ્યોઽપિ તસ્મૈ નમસ્તે ॥ ૨૩॥

સ્વમાયાપરિભ્રાન્તચિત્તા અજસ્રં પરાગ્વસ્તુ પશ્યન્તિ ન પ્રત્યગર્થમ્ ।
મુમુક્ષુસ્તુ યં પશ્યતિ પ્રત્યગર્થે પરબ્રહ્મરૂપાય તસ્મૈ નમસ્તે ॥ ૨૪॥

ઉપાસ્યોઽન્ય ઈશોઽસ્ત્યહં ત્વન્ય ઈશાત્પશુર્વેદ નૈનં ભજત્યત્ર યોઽસ્માત્ ।
વિવેકી સ એવાહમસ્મીત્યુપાસ્તે યમાત્માનમીશં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૨૫॥

ભયં ભેદદૃષ્ટેર્ભવત્યુલ્બણં વૈ મહાન્તો ન ભેદં પ્રપશ્યન્તિ તસ્માત્ ।
યદજ્ઞાનતો દૃશ્યતે ભેદ એવં ભિદામોહહન્ત્રે નમસ્તેઽસ્તુ તસ્મૈ ॥ ૨૬॥

વિરિઞ્ચેન્દ્રસૂર્યાગ્નિરુદ્રેન્દુવિષ્ણૂન્પ્રકલ્પ્યૈક એવાદ્વયઃ સર્વસાક્ષી ।
જગચ્ચક્રવિભ્રાન્તિકર્તા ય આત્મા ન દૃશ્યેત કેનાપિ તસ્મૈ નમસ્તે ॥ ૨૭॥

જગજ્જાગ્રતિ સ્થૂલમેતત્સમાનં મનોવાસિતં સ્વપ્ન આનન્દનિદ્રામ્ ।
સુષુપ્તૌ સ્વમેવાભિપશ્યન્મુદાઽઽસ્તે તુરીયો ય આત્મા નમસ્તેઽસ્તુ તસ્મૈ ॥ ૨૮॥

સમસ્તાદપિ સ્થૂલસૂક્ષ્માચ્છરીરાત્પરઃ કારણાચ્ચાન્ય આત્મા સમીપે ।
ય એકો વિદૂરેઽપિ તિષ્ઠન્ જનાનાં મહિમ્નિ સ્વકીયે ચ તસ્મૈ નમસ્તે ॥ ૨૯॥

યમાશ્રિત્ય નાસ્તીતિ ચાસ્તીતિ વેદે પ્રવૃત્તો વિરુદ્ધોઽપિ વાદોઽખિલાત્મા ।
નમસ્તેઽઙ્ઘ્રિપાણ્યાદિહીનાય નિત્યં સમસ્તાઙ્ઘ્રિપાણ્યાદિયુક્તાય તસ્મૈ ॥ ૩૦॥

યોઽણોરણીયાંસમાત્માનમેકં મહન્તં મહદ્વસ્તુનશ્ચેતનેભ્યઃ ।
પરં ચેતનં નિત્યતો વેદ નિત્યં યમેવેહ વિદ્વાન્નમસ્તેઽસ્તુ તસ્મૈ ॥ ૩૧॥

યદાનન્દલેશોપભોગેન સર્વે સદાનન્દિનઃ સમ્ભવન્ત્યત્ર તસ્મૈ ।
સદાનન્દસન્દોહપૂર્ણાર્ણવાય પ્રસન્નાય તુભ્યં નમઃ કેવલાય ॥ ૩૨॥

યમુત્સૃજ્ય મર્ત્યા ભજત્યન્યદેવાન્ન તેષાં વિમુક્તિઃ ફલં કિન્તુ તુચ્છમ્ ।
શ્વપુચ્છં ગૃહીત્વા તરિષ્યન્તિ કે વા સમુદ્રં હ્યપારં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૩૩॥

યથા વિધ્યુપાસ્તૌ ફલં દાસ્યતીશસ્તથા વિષ્ણુરુદ્રેન્દ્રવહ્ન્યાદ્યુપાસ્તૌ ।
ફલં દાસ્યતિ બ્રહ્મ યદ્વીશસંજ્ઞઃ સ્વકર્માનુસારં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૩૪॥

ન યદ્બ્રહ્મ મોક્ષપ્રદં સ્યાત્કદાચિદ્વિનેહૈવ મુક્તિપ્રદં જ્ઞાનમેકમ્ ।
ન મોક્ષં કૃતઃ કર્મણાતઃ કૃતેન પ્રપન્નાર્તિહન્ત્રે નમસ્તેઽસ્તુ તસ્મૈ ॥ ૩૫॥

ઇદં નેતિનેતીત્યમૂર્તં ચ મૂર્તં નિરસ્યૈવ સર્વં જગદ્દૃશ્યમેતત્ ।
નિષેધાવધિ બ્રહ્મ યચ્છિષ્યતે વૈ મનોવાગતીતાય તસ્મૈ નમસ્તે ॥ ૩૬॥

પરિત્યજ્ય યત્તત્ત્વસમ્યગ્વિચારં પ્રવર્તેત યસ્તીર્થયાત્રાજપાદૌ ।
કરસ્થાન્નમુત્સૃજ્ય લેઢીતિ હસ્તં ન યસ્યોદયસ્તસ્ય તસ્મૈ નમસ્તે ॥ ૩૭॥

ન ચેત્પ્રાણવર્ગેષ્વયં સ્યાજ્જડત્વાત્કથં પ્રાણનાડી ક્રિયાકારિતૈષામ્ ।
અતો યસ્ય સિદ્ધા સ્થિતા યુક્તિતોઽપિ પ્રપઞ્ચપ્રકાશાચ્ચ તસ્મૈ નમસ્તે ॥ ૩૮॥

ભયં યદ્વિદાં નાસ્તિ મૃત્યુશ્ચ નૂનં બિભેત્યેવ વાય્વાદિ સર્વે ચ યસ્માત્ ।
શરીરેઽહમિત્યત્ર બુદ્ધેર્ભયં સ્યાન્નમસ્તેઽભયાયાશરીરાય તસ્મૈ ॥ ૩૯॥

ગુરૌ ભક્તિયુક્તૈરિહૈવેશ્વરો યઃ સુવિજ્ઞેય આત્માઽન્યથા ત્વબ્દકોટ્યા ।
અવિજ્ઞેય એકઃ સ્વબુદ્ધિસ્થિતોઽપિ પ્રિયાયાખિલેભ્યોઽપિ તસ્મૈ નમસ્તે ॥ ૪૦॥

સમસ્તાત્પ્રિયો દેહ એવાક્ષમસ્માત્પ્રિયં પ્રાણ એવાક્ષતોઽપિ પ્રિયોઽતઃ ।
પ્રિયઃ પ્રત્યગાત્મૈવ ભોક્તા પરો યઃ સ્વતોઽતિપ્રિયાયેહ તસ્મૈ નમસ્તે ॥ ૪૧॥

પ્રિયાદાત્મનોઽન્યન્ન વિદ્યેત કિઞ્ચિત્ક્વચિત્કારણાન્નૈવ ભિદ્યેત કાર્યમ્ ।
ય આત્મા સમસ્તસ્ય હેતુર્નમસ્તે નિદાનાય સર્વસ્ય દૃશ્યસ્ય તસ્મૈ ॥ ૪૨॥

સમસ્તં જગત્કારણાન્નૈવ ભિન્નં સમસ્તાત્મનઃ કેવલાદદ્વિતીયાત્ ।
પરબ્રહ્મણોઽવ્યાકૃતેશાચ્ચ યસ્માન્નમસ્તે ક્ષરાયાક્ષરાયાપિ તસ્મૈ ॥ ૪૩॥

યતઃ કારણાન્નેહ કાર્યં વિભિન્નં તતો બ્રહ્મણો નૈવ ભિન્નં જગત્સ્યાત્ ।
સમસ્તં જગદ્બ્રહ્મ તચ્ચાસ્મિ વિદ્વાનુપાસ્તે યમેકં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૪૪॥

યથા મૃદ્વિકારો મૃતો નૈવ ભિન્નસ્તથા ચિદ્વિકારશ્ચિતો નૈવ ભિન્નઃ ।
અતઃ સર્વમેતચ્ચિદેવેતિ વિદ્વાન્વિજાનાતિ યદ્બ્રહ્મ તસ્મૈ નમસ્તે ॥ ૪૫॥

જગદ્યસ્ય સર્વં શરીરં જગન્ન પ્રમાતૃપ્રમાણપ્રમેયાત્મકો યઃ ।
સમસ્તાન્તરાયાખિલેશાય તસ્મૈ નમઃ સચ્ચિદાનન્દરૂપાય તુભ્યમ્ ॥ ૪૬॥

વિદુર્યં ન સર્વેઽપિ યો વેત્તિ સર્વં સમસ્તેષુ ભૂતેષુ તિષ્ઠન્ત્વયં યઃ ।
સમસ્તાન્તરઃ પ્રેરયત્યેવ સર્વાન્નમસ્તે સમસ્તાન્તરેશાય તસ્મૈ ॥ ૪૭॥

ન દેહેન્દ્રિયપ્રાણધીભૂતવૃન્દં ન સંસાર્યહં કિન્તુ ચિન્માત્રમેકમ્ ।
પરં ચાપરં બ્રહ્મવિદ્વાન્વિશુદ્ધસ્તદસ્તીતિ યદ્વેદ તસ્મૈ નમસ્તે ॥ ૪૮॥

યથા સ્વપ્નદૃષ્ટા ચ હસ્ત્યાદિ મિથ્યા તથા સર્વમેતજ્જગદ્ભાતિ મિથ્યા ।
અધિષ્ઠાનમાત્રં જગદ્દ્રષ્ટૃ સત્યં વિશુદ્ધં ચ યદ્બ્રહ્મ તસ્મૈ નમસ્તે ॥ ૪૯॥

પરા ચાપરા યસ્ય માયા દ્વિધેયં જગત્કર્તૃતામક્રિયસ્યાતનોતિ ।
સ્વતો દ્રષ્ટૃદૃશ્યાતિરિક્તાય તસ્મૈ નમઃ કેવલાયાવ્યયાયાત્મનેઽસ્તુ ॥ ૫૦॥

વિશુદ્ધાત્મતત્ત્વાપરિજ્ઞાનમૂલં વિશેષાવભાસં સુખિત્વાદિરૂપમ્ ।
વિશુદ્ધાત્મતત્ત્વે પરિજ્ઞાત એતત્ક્વચિન્નાસ્તિ યસ્મિન્નમસ્તેઽન્તુ તસ્મૈ ॥ ૫૧॥

ન હિ ત્વક્પરિજ્ઞાનતઃ સર્પભાનં ક્વચિદ્વિદ્યતે સર્પતા કલ્પિતા સ્યાત્ ।

તથા કલ્પિતં સર્વમેતચ્ચ યસ્મિન્નમસ્તે સમસ્તાવભાસાય તસ્મૈ ॥ ૫૨॥

સુષુપ્તૌ ન સંસારલેશોઽસ્તિ કશ્ચિત્પ્રબોધેઽખિલાહઙ્કૃતૌ દૃશ્યતેઽયમ્ ।
અતોઽહઙ્કૃતેરેવ સંસાર ઇત્થં ન વૈ સંસૃતિર્યસ્ય તસ્મૈ નમસ્તે ॥ ૫૩॥

ન શાસ્તા ન શિષ્યો ન શાસ્ત્રં ન વિશ્વં નં શાક્તં ચ શૈવં મતં વૈષ્ણવં વા ।
સુષુપ્તૌ તદાનીં યદસ્ત્યાત્મમાત્રં સ્વતો નિષ્પ્રપઞ્ચાય તસ્મૈ નમસ્તે ॥ ૫૪॥

જડાનાં પ્રવૃત્તિઃ સ્વતો નાસ્તિ યસ્માદ્વિભોશ્ચેતનાત્સા પ્રવૃત્તિઃ પ્રવૃત્તા ।
મનઃપ્રાણદેહેન્દ્રિયવ્યાકૃતાનાં નમસ્તે ચિદાત્મસ્વરૂપાય તસ્મૈ ॥ ૫૫॥

મનઃપ્રાણદેહેન્દ્રિયવ્યાકૃતાનિ સ્વતઃ કાષ્ઠતુલ્યાનિ યત્સન્નિધાનાત્ ।
સ્વયં ચેતનાનીવ ભાન્ત્યેવ મોહાજ્જડેભ્યઃ પરસ્મૈ નમસ્તેઽસ્તુ તસ્મૈ ॥ ૫૬॥

બહિર્બુધ્યતે પ્રાણિબુદ્ધિઃ પદાર્થાન્ન યં બુધ્યતે પ્રાણનાથં સ્વસંસ્થમ્ ।
સમસ્તાન્તરાત્માનમેકં ચ તસ્મૈ નમસ્તે વિરિઞ્ચ્યાદિધીબોધયિત્રે ॥ ૫૭॥

પરં યત્સ્વરૂપં વિદુર્નાપિ દેવાઃ કુતોઽન્યે મનુષ્યાદયો બાહ્યચિત્તાઃ ।
તદેહવામસ્મીતિ ભક્તાસ્ત્વજસ્રં ભજન્ત્યદ્વિતીયં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૫૮॥

સમસ્તેષુ દેહેષુ સૂર્યેઽપિ તિષ્ઠન્ચ એકોઽખિલાત્મા સમસ્તૈકસાક્ષી ।
સ એવાહમસ્મીતિ વેદાન્તવિદ્ભિઃ સદોપાસ્યતત્ત્વાય તસ્મૈ નમસ્તે ॥ ૫૯॥

અહં વિશ્વકસ્તૈજસઃ પ્રાજ્ઞરૂપો વિરાટ્સૂત્રમાયેશરૂપાન્ન ભિન્નઃ ।
ઉપાધૌ વિભિન્નેઽપિ કિન્ત્વસ્મિ સોઽહં યમેવં ભજન્વેદ તસ્મૈ નમસ્તે ॥ ૬૦॥

સમસ્તાનિ કર્માણિ સન્ત્યજ્ય વિદ્વાંસ્તદેવાહમસ્મીત્યુપાસ્તે હ્યજસ્રમ્ ।
યદેવાહ સર્વાગમાન્તૈકવેદ્યં નમસ્તેઽનિશં ચિન્તનીયાય તસ્મૈ ॥ ૬૧॥

ન કૃત્યાકૃતેઃ પ્રત્યવાયઃ ક્વચિત્સ્યાદભાવાત્કથં ભાવ ઉત્પત્સ્યતેઽતઃ ।
અહં પ્રત્યવાયીતિ કૃત્યાકૃતે સ્યામયં યસ્ય મોહાન્નમસ્તેઽસ્તુ તસ્મૈ ॥ ૬૨॥

અધર્મોઽયમેવાયમેવાત્ર ધર્મો ભવેદિત્યયં મોહ એવાખિલાનામ્ ।
યદજ્ઞાનિનાં પ્રત્યવાયપ્રદં સ્યાત્ક્વચિન્ન હ્યભાવો નમસ્તેઽસ્તુ તસ્મૈ ॥ ૬૩॥

અધર્મં ચ હૃત્સ્થં વિહાય પ્રશાન્તા ભજન્ત્યત્ર નૂનં સ્વરૂપં યદીયમ્ ।
સ્વરૂપં વિચાર્યા મૃતેરા સુષુપ્તેર્નમસ્તેઽસ્તુ તસ્મૈ વિમુક્તિપ્રદાય ॥ ૬૪॥

ન વૈ બદ્ધતા મુક્તતા વા કદાચિત્ક્વચિન્નિત્યમુક્તસ્ય કિં ચાત્મનોઽતઃ ।
બહિશ્ચેતસોઽન્તશ્ચ ગત્યાગતી તે નમશ્ચિત્તવિક્ષેપહર્ત્રેઽસ્તુ તસ્મૈ ॥ ૬૫॥

યથા ક્ષીણચિત્તસ્તથૈવાત્મનિષ્ઠઃ પુમાન્નિત્યમુક્તો ભવેદદ્વિતીયઃ ।
યથા ચેતસોઽક્ષીણતા યત્પ્રસાદાત્તથા ત્વત્પ્રસાદાય તસ્મૈ નમસ્તે ॥ ૬૬॥

પ્રસન્ને ત્વયિ પ્રાણિનાં કિન્ન લભ્યં પરસ્ત્વત્પ્રસાદાન્ન લાભોઽસ્તિ કશ્ચિત્ ।
બુધોઽતોઽનિશં યત્પ્રસાદાભિકાઙ્ક્ષી નમસ્તે પ્રપન્નપ્રસન્નાય તસ્મૈ ॥ ૬૭॥

પૃથિવ્યાદિયુક્તાઽપરબ્રહ્મનિષ્ઠા ન મુખ્યા ભવન્ત્યત્ર જન્માસ્તિ તેષામ્ ।
નિરસ્તાખિલોપાધિનિષ્ઠો હિ મુખ્યો ન યસ્યેહ જન્માસ્તિ તસ્મૈ નમસ્તે ॥ ૬૮॥

ન મુખ્યં સુષુમ્નેરધિષ્ઠાનતોઽન્યત્સુષુમ્નેરધિષ્ઠાનમાત્રં હિ મુખ્યમ્ ।
યદજ્ઞાનતો દૃપ્તબાલાકિરેતન્નૃપાદ્વેદ ચૈવં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૬૯॥

વિરિઞ્ચાદિલોકાદિહાવૃત્તિરસ્તિ ક્વચિચ્ચાત્મલોકાદનાવૃત્તિરસ્માત્ ।
ધ્રુવો હ્યાત્મલોકોઽધ્રુવાનાત્મલોકાત્પરો યોઽસ્તિ ચૈકો નમસ્તેઽસ્તુ તસ્મૈ ॥ ૭૦॥

પરં વેદ સન્માત્રમુદ્દાલકેન સ્વપિત્રોપદિષ્ટો યદા શ્વેતકેતુઃ ।
યમાત્માનમાત્મસ્થમવ્યક્તમેકં નમસ્તેઽનિશં સત્સ્વરૂપાય તસ્મૈ ॥ ૭૧॥

ભૃગુર્વેદ પિત્રોપદિષ્ટોઽન્તરેવ પ્રકૃષ્ટઃ પરબ્રહ્મરૂપાત્મલોકમ્ ।
અનન્તાઽદ્વયાનન્દવિજ્ઞાનસત્યં યમેકં વિશુદ્ધાય તસ્મૈ નમસ્તે ॥ ૭૨॥

વિહાયૈવ કોશાત્પરં પઞ્ચ વેદ સ્વરૂપં યદાનન્દકોશસ્ય પુચ્છમ્ ।
મુમુક્ષુઃ સુષુમ્નેરધિષ્ઠાનમેકં સદાત્મસ્વરૂપાય તસ્મૈ નમસ્તે ॥ ૭૩॥

અનન્તાનિ શાસ્ત્રાણ્યધીત્યાપિ વિદ્વાન્ન દુઃખેતરો નારદોઽનાત્મવિત્ત્વાત્ ।
ઋષિર્માનસાદ્વેદ યં શોકહત્યૈ નમસ્તે સુખૌઘાય તસ્મૈ વિભૂમ્ને ॥ ૭૪॥

ઋષેર્યાજ્ઞવલ્ક્યાદ્વિદેહો મહાત્મા યદેવાભયં બ્રહ્મ સમ્યગ્વિદિત્વા ।
સ્વમેવાભયં તદ્ધ્યભૂદ્વેદવેદ્યં સમસ્તાભયાપ્યાય તસ્મૈ નમસ્તે ॥ ૭૫॥

વિદિત્વાત્ર ભૂમાનમેનશ્છિદેઽસ્તિ પ્રવાચ્યં કિમુ પ્રાણવિત્પાપનાશે ।
અતઃ પ્રાણવિદ્ધામનાદૃત્ય વિદ્વાનુપાસ્તે યમીશં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૭૬॥

અજસ્રાન્નદાનં પરિત્યજ્ય જાનશ્રુતિર્હ્યૈક્યમભ્યાગમદ્ધંસવાક્યાત્ ।
સ વૈ પ્રાણવિત્પ્રાણ ઉત્કર્ષવાંસ્તત્પરોઽસ્માદ્ય આત્મા નમસ્તેઽસ્તુ તસ્મૈ ॥ ૭૭॥

રવીન્દ્વગ્નિતેજો જગદ્ભાસકશ્ચેન્ન તસ્યાપિ ચિત્સન્નિધાનેન તત્સ્યાત્ ।
ન યત્સન્નિધાનં વિના કિઞ્ચિદસ્તિ ક્વચિદ્વસ્તુ તસ્મૈ નમો જ્યાતિષે ચ ॥ ૭૮॥

પરં જ્યોતિષાં જ્યોતિરાત્માઽઽખ્યમેતદ્રવીન્દ્વાદિબુદ્ધ્યાદિવિદ્યોતકં યત્ ।
વિદિત્વૈવ નૂનં નરો બ્રાહ્મણઃ સ્યાદમર્ત્યશ્ચ તસ્મૈ નમઃ સ્વાત્મને તે ॥ ૭૯॥

યથાશ્વત્થવૃક્ષે સ્વદેહે ચ તુલ્યં સ્વમેવાબ્રવીદ્વાસુદેવોઽર્જુનાય ॥

તથા યસ્ય સામ્યં વિજાનાતિ વિદ્વાન્નમસ્તે સમસ્તાત્મરૂપાય તસ્મૈ ॥ ૮૦॥

દ્વિજે પુલ્કસે હસ્તિનિ સ્વે શરીરે સમઃ સાત્ત્વિકે રાજસે તામસે ચ ।
ય આત્મા ગુણૈસ્તૈરસંસ્પૃષ્ટ ઈશો નમસ્તે સદા નિષ્કળઙ્કાય તસ્મૈ ॥ ૮૧॥

યમાશ્ચર્યવદ્વક્તિ કશ્ચિચ્છૃણોતિ પ્રશાન્તસ્તુ જાનાતિ ન હ્યપ્રશાન્તઃ ।
વિદિત્વાઽપિ સાક્ષાત્કરોત્યત્ર નાન્યશ્ચિદસ્મીતિ દીક્ષ્યાય તસ્મૈ નમસ્તે ॥ ૮૨॥

પતી દેવદૈત્યૌઘયોઃ પદ્મજાદ્યં ચતુર્વારમાકર્ણયન્તૌ તથાઽપિ ।
ન જાનાતિ કશ્ચિત્તયોર્વેદ ચાન્યો હ્યતો દુર્વિતર્ક્યાય તસ્મૈ નમસ્તે ॥ ૮૩॥

શરીરેન્દ્રિયપ્રાણવિજ્ઞાનશૂન્યેષ્વિહૈકૈકમાત્મેતિ દૃપ્તા વદન્તિ ।
તથા બુદ્ધિસમ્યગ્વિચારાસમર્થા યદજ્ઞાનમોહા હિ તસ્મૈ નમસ્તે ॥ ૮૪॥

અનેકત્વકર્તૃત્વભોક્તૃત્વધર્મઃ સ આત્મા વિભુશ્ચિદ્ગુણશ્ચેતિ કેચિત્ ।
ન કર્તૈવ ભોક્તા ક્વચિચ્ચેતિ ચાન્યે યદજ્ઞા વદન્તીહ તસ્મૈ નમસ્તે ॥ ૮૫॥

અનેકાત્મના પ્રેરકોઽન્યો ન હીશોઽસ્ત્વિવતિ પ્રાહુરેકે ન ચાસ્તીતિ ચાન્યે ।
વિવાદાસ્પદં નૈવ માયા વિના યન્નમસ્તેઽસ્તુ તસ્મૈ વિવાદાત્પરાય ॥ ૮૬॥

વિવાદો નિવર્તેત યસ્ય પ્રસાદાત્સ્વરૂપપ્રકાશે જગદ્ભાવનસ્ય ।
નિવૃત્તે વિવાદે પુનર્નૈવ લોકે ભ્રમન્ત્યદ્વિતીયાય તસ્મૈ નમસ્તે ॥ ૮૭॥

વિભું ચિત્તનિષ્ઠં યદઙ્ગુષ્ટમાત્રં પુરાણં પુમાંસં વદન્ત્યત્ર વેદાઃ ।
જનાનાં હૃદઙ્ગુષ્ઠમાત્રં યતોઽસ્માદનઙ્ગુષ્ઠમાત્રાય તસ્મૈ નમસ્તે ॥ ૮૮॥

ભ્રુવોર્મધ્યમેવાવિમુક્તં મુનીનાં મહાક્ષેત્રમિત્યત્ર બુદ્ધેઃ શ્રુતઞ્ચ ।
ન વા વારણાસીપુરં ગન્તુમિચ્છેત્સ્વરૂપે સ્થિતો યસ્ય તસ્મૈ નમસ્તે ॥ ૮૯॥

શરીરે યથાઽહંમતિઃ સર્વજન્તોસ્તથા મુક્તિબુદ્ધિશ્ચ કાશીમૃતેર્વા ।
સ્વરૂપપ્રકાશં વિના યસ્ય મુક્તિર્ન વૈ સમ્ભવેત્કાપિ તસ્મૈ નમસ્તે ॥ ૯૦॥

સ્વરૂપપ્રકાશૈકહેતુર્હિ યસ્ય પ્રકૃષ્ટાગમાન્તાર્થસમ્યગ્વિચારઃ ॥

અતો યત્પ્રકાશાય વેદાન્તનિષ્ઠોઽનિશં સ્યાદ્વિવેકી નમસ્તેઽસ્તુ તસ્મૈ ॥ ૯૧॥

વદન્તશ્ચ રુદ્રાદયોઽપ્યાત્મતત્ત્વં ન જાનન્ત્યતઃ કેઽપિ વેદાન્તનિષ્ઠાઃ ।
તતસ્તાનિહોત્સૃજ્ય વેદાન્તનિષ્ઠો ભવેદ્યત્પ્રબોધાય તસ્મૈ નમસ્તે ॥ ૯૨॥

સુરેન્દ્રો વિદિત્વૈવ યસ્ય સ્વરૂપં સમસ્તાદઘાદ્વૃત્રહત્યાદિરૂપાત્ ।
વિમુક્તો હિ વેદાન્તનિષ્ઠો મુદાઽઽસ્તે નિરસ્યાભિમાનં નમસ્તેઽસ્તુ તસ્મૈ ॥ ૯૩॥

યદીયં સ્વરૂપં વિચાર્યૈવ તિષ્ઠન્સદા વન્દનીયોઽમરૈરિન્દ્રમુખ્યૈઃ ।
વિશુદ્ધો હ્યયં દેવવન્દ્યત્વતો વૈ નમસ્તેઽસ્તુ તસ્મૈ વિશુદ્ધિપ્રદાય ॥ ૯૪॥

સ્વયં શુદ્ધ એવાન્યશુદ્ધિં દદાતિ ક્વચિન્ન હ્યશુદ્ધોઽન્યશુદ્ધિપ્રદઃ સ્યાત્ ।
સ્મૃતઃ શુદ્ધિદઃ સર્વજન્તોર્ય આત્મા વિશુદ્ધઃ પવિત્રાય તસ્મૈ નમસ્તે ॥ ૯૫॥

સકૃત્સંસ્મૃતશ્ચેત્સમસ્તં ચ પાપં દહત્યગ્નિવદ્યસ્ત્વિહાત્યન્તદીપ્તઃ ।
ચિદેવાહમિત્યેવ બુદ્ધૌ પ્રવેશસ્વદીપ્તિર્નમસ્તેઽસ્તુ તસ્મૈ મહિમ્ને ॥ ૯૬॥

ન હિ સ્નાનદાનાદિના પાપનાશે તુ તત્સંસ્કૃતિઃ ક્વાપિ નશ્યેત્કદાપિ ।
વિના યત્સ્મૃતિં સ્મૃત્યુપાયં ચ મુક્ત્વા સ્મરત્પાપહન્ત્રે નમસ્તેઽસ્તુ તસ્મૈ ॥ ૯૭॥

અનાત્મન્યહન્તાભિમાનં નિરસ્ય સ્વરૂપપ્રકાશસ્તતઃ સર્વપાપમ્ ।
ન સંસ્કૃત્યનાત્માશ્રયં સ્યાદ્વિનષ્ટં સ્મૃતેર્યત્પ્રકાશે તુ તસ્મૈ નમસ્તે ॥ ૯૮॥

અનાકર્ણ્ય વેદાન્તભાષ્યં સમગ્રં ન કસ્યપિ યત્સ્મૃત્યુપાયોઽસ્તિ કશ્ચિત્ ।
અતસ્તચ્ચિકીર્ષા સ્વતો યસ્ય જાતા નમસ્તે દયાળુસ્વરૂપાય તસ્મૈ ॥ ૯૯॥

સમસ્તાગમાન્તાનિહ વ્યાચિકીર્ષુઃ સ્વયં શઙ્કરાચાર્યરૂપાવતીર્ણઃ ।
કૃતવ્યાસસૂત્રાદિભાષ્યો ય આત્મસ્વરૂપૈક્યધીદાય તસ્મૈ નમસ્તે ॥ ૧૦૦॥

ચતુર્ભિઃ પ્રશાન્તૈઃ સ્વશિષ્યૈર્યુતઃ સન્ ભુવં પર્યટન્નાત્મનિષ્ઠાઽખિલાત્મા ।
સ્વભાષ્યપ્રચારં સદા કારમન્યો વિભાત્યદ્વિતીયાય તસ્મૈ નમસ્તે ॥ ૧૦૧॥

વિરાટ્સૂત્રમાયેશતુર્યસ્વરૂપૈઃ ક્રમાત્તોટકાચાર્યનામાદિસંજ્ઞૈઃ ।
ચતુર્વ્યૂહવેષૈઃ સ્વશિષ્યૈર્યુતાયાદ્વયાયાત્મને તે નમો નિર્ગુણાય ॥ ૧૦૨॥

અજં કર્મઠં વિશ્વરૂપં વિદિત્વા તુરીયાશ્રમં ચાથ તસ્મૈ પ્રદાય ।
વ્યધાદૃશ્યશ◌ૃઙ્ગાશ્રમે શારદાર્ચાપરં તત્ત્વરક્ષાય તસ્મૈ નમસ્તે ॥ ૧૦૩॥

ય આચાર્યભાષ્યાણ્યધીત્યૈવ ભક્ત્યા લભન્તે નિજાનન્દમાત્મસ્વરૂપમ્ ॥

ગુરુસ્તૈરયં વન્દ્ય આત્માઽઽત્મવિદ્ભિસ્તતઃ સર્વવન્દ્યાય તસ્મૈ નમસ્તે ॥ ૧૦૪॥

નમઃ શઙ્કરાચાર્ય તુભ્યં પુરસ્તાન્નમઃ પૃષ્ઠતઃ પાર્શ્વતશ્ચાધ ઊર્ધ્વમ્ ।
નમઃ સર્વતઃ સર્વરૂપાય તસ્મૈ વિશુદ્ધાત્મને બ્રહ્મણે તે નમસ્તે ॥ ૧૦૫॥

અહં દેહબુદ્ધ્યા તવૈવાસ્મિ દાસો હ્યહં જીવબુદ્ધ્યાઽસ્મિ તેંઽશૈકદેશઃ ।

ત્વમેવાસ્મ્યહં ત્વાત્મબુદ્ધ્યા તથાપિ પ્રસીદાન્વહં દેહબુદ્ધ્યા નમસ્તે ॥ ૧૦૬॥

સ ભાષ્યાર્થ આશુ સ્ફુરત્વન્તકાલે ચિદાભાસચૈતન્યદૃક્ત્વત્પ્રસાદાત્ ।
ગતિર્નાન્યથા મે સમસ્તાપરાધં ક્ષમસ્વાખિલાત્મન્નમસ્તેઽસ્તુ નિત્યમ્ ॥ ૧૦૭॥

નમો ભાષ્યવૃન્દાય ભાષ્યોપદેષ્ટ્રે નમો ભાષ્યકૃદ્ભ્યો નમો ભાષ્યવિદ્ભ્યઃ ।
નમો ભાષ્યવૃન્દાર્થભૂતાય ભૂમ્ને વિશુદ્ધાત્મને બ્રહ્મણેઽસ્મૈ પરસ્મૈ ॥ ૧૦૮॥

શતોર્ધ્વાષ્ટકશ્લોકમેતદ્ભુજઙ્ગપ્રયાતં પઠેદ્યોઽત્ર ભક્ત્યા ત્વદીયમ્ ।
ચિદાભાસચિદ્રૂપમેકં પદાબ્જં સ્મરન્સ્વસ્વરૂપેણ નૂનં રમેત ॥ ૧૦૯॥

ભુજઙ્ગપ્રયાતાર્થમત્યન્તભક્ત્યા સકૃદ્વા સ્મરેત્પ્રત્યહં શ્રીગુરોર્યઃ ।
નિરસ્તાન્ધકારઃ સ આનન્દરૂપં વ્રજત્યચ્યુતં ત્વાં ત્વદીયપ્રસાદાત્ ॥ ૧૧૦॥

અહં બ્રહ્મ ભૂત્વાપિ નેતિ ભ્રમોઽભૂત્તદીયસ્વરૂપાવબોધાત્પુરા મે ।
ગુરો ત્વત્પ્રસાદાદ્વિમુક્તોઽહમસ્મિ ચિતાભાસચિદ્રૂપ આત્મા વિશુદ્ધઃ ॥ ૧૧૧॥

અતો બુદ્ધિમાંસ્ત્વત્પ્રસાદાય નિત્યં ભુજઙ્ગપ્રયાતં પઠેદ્વા તદર્થમ્ ।
સ્મરેદ્વા ગુરો તે પ્રણમ્યૈવ ભૂયશ્ચિદાભાસચિદ્રૂપમેકં પરં તત્ ॥ ૧૧૨॥

મુનીન્દ્રૈઃ પુરાણૈરનુધ્યેયમીશં વિરિઞ્ચાદિભિઃ સર્વદેવૈશ્ચ વન્દ્યમ્ ।
કથં ત્વામહં સ્તોતુમિચ્છન્ભવન્તં ક્વ વા સાધયે નેહ કિં કિં મહેશે ॥ ૧૧૩॥

કૃપા તે કૃપાળો વિમુગ્ધં વિશુદ્ધં કરોતીહ મૂકં ચ વાચાલમીશમ્ ।
અતસ્ત્વત્કૃપાવૈભવેનૈવમેતત્કૃતં મે ચિકીર્ષાખિલાત્મન્નમસ્તે ॥ ૧૧૪॥

ઇતિ શ્રીગુરુભુજઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

Pujya Sri Kumbakonam Swamigal has discovered and circulated this beautiful Stotra on Adi Sankaracharya, Guru Bhujanga Stotram. It is an excellent summary of Advaita Vedanta. The book contains a translation in Tamil by Sri Brahmananda Swamigal of Thanjavur.

Encoded by P.R. Kannan prkannanvashi at yahoo.com
Proofread by P.R. Kannan, PSA Easwaran

*A stotra on Adi Shankaracharya in bhujangaprayAta meter*

pdf was typeset on October 23, 2024

Please send corrections to *sanskrit@cheerful.com*